C. S. (Main) Exam : 2011

Sl. No.

D-DTN-L-TLB

# SANSKRIT

## Paper II

## (Literature)

*Time Allowed : Three Hours* | *Maximum Marks : 300*

## INSTRUCTIONS

*Candidates should attempt Question Nos. 1 and 5 which are compulsory, and any* ***three*** *of the remaining questions, selecting at least* ***one*** *question from each Section.*

*The number of marks carried by each question is indicated at the end of the question.*

*Question Nos. 4, 5 and 6 must be answered in Sanskrit and the remaining questions must be answered either in Sanskrit or in the medium of examination specified in the Admission Certificate issued to you.*

*Answers written in Sanskrit must be in Devanāgarī script.*

(Contd.)

## Section 'A'

**1.** अधस्तनयोः विषययोः सारगर्भिताः विचाराः प्रमाणपुरस्सरं प्रतिपाद्यन्ताम् — 30×2=60

(a) 'क इह रघुकारे न रमते' ।

(b) 'नैषधं विद्वदौषधम्' ।

**2.** अधोनिर्दिष्टानां विषयाणां सारपरिपूर्णा समीक्षा विधेया — 20×3=60

(a) वाल्मीकिरामायणान्तर्गत-सुन्दरकाण्डस्य काव्यसौन्दर्यम् ।

(b) श्रीमद्भगवद्गीतायां प्रतिपादितः कर्मसिद्धान्तः ।

(c) ईशावास्योपनिषदि विद्या-अविद्या-विवेचनम् ।

**3.** अधस्तनयोः सारगर्भिताः टिप्पण्यः कार्याः — 30×2=60

(a) शूद्रकविरचिते मृच्छकटिक-नाटके नाट्यसौन्दर्यम् ।

(b) वेणीसंहार-नाटके कः खलु नायकः, कथञ्च ।

**4.** अधस्तनेषु विषयेषु नागराक्षरैः संस्कृतभाषायामेव समाधानं विधेयम् — 20×3=60

(a) मेघदूते प्रतिपादितः मेघमार्गः ।

(b) 'अमरुकशतकम्'-काव्ये सौन्दर्यवर्णनम् ।

(c) 'गीतगोविन्द'-गीतिकाव्ये भक्तिरसः ।

## Section 'B'

**5.** नागराक्षरैः संस्कृतभाषायां व्याख्यायन्ताम् — 20×3=60

(a) त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥

(b) आमेखलं संचरतां घनानां छायामधः सानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥

(c) वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः ॥

**6.** अधोलिखितानां व्याख्या नागराक्षरैः संस्कृतभाषायां विधेया — 20×3=60

(a) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥

(b) वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥

(c) कुर्वतीं प्रभया देवीं सर्वा वितिमिरा दिशः ।
तां नीलकण्ठीं बिम्बोष्ठीं सुमध्यां सुप्रतिष्ठिताम् ॥

**7.** अधोलिखितानामाशयं ससन्दर्भं प्रतिपाद्यताम् — 20×3=60

(a) मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ।

(b) यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥

(c) गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शङ्खाभरणमानन-शोभासमुदयमधिकतरमुपजनयति। हरति च सकलम् अतिमलिनमप्यन्धकारमिव दोषजातं प्रदोषसमयनिशाकर इव।

**8.** अधोलिखितानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या —

20×3=60

(a). प्रच्छाद्य राजमहिषीं नृपतेर्हितार्थं
कामं मया कृतमिदं हितमित्यवेक्ष्य।
सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ
किं वक्ष्यतीति हृदयं परिशङ्कितं मे॥

(b) शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥

(c) म्लानस्य जीवकुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि॥